**आदौ मुख्यवार्ता:**

- प्रधानमन्त्री नरेन्द्रमोदी अद्य भारतमण्डपे सोल इत्येतस्य सम्मेलनस्य प्रथमसंस्करणस्य उद्घाटनं विहितवान्। भारतं वैश्विकशक्तिकेन्द्रत्वेन उद्भूतम् अस्ति इत्यस्मात् कारणात् देशस्य प्रत्येकस्मिन् क्षेत्रे ऊर्जावतां नेतृणाम् आवश्यकता वर्तते इति प्रधानमन्त्रिणा प्रोदीरितं ।
- भूटान-देशस्य प्रधानमन्त्री दाशो शेरिङ्ग् तोब्गे इत्यसौ अवदत् यत् सोल इति प्रामाणिकनेतृणां पोषणार्थं प्रधानमन्त्रिणः नरेन्द्रमोदिनः अविचलप्रतिबद्धतायाः अन्यं प्रमाणमस्ति इति।
- विदेशमन्त्रालयेन यू.एस्.एड. इत्येतस्य वित्तपोषणस्य विषये चिन्ता प्रकटिता, मन्त्रालयस्य प्रवक्ता रणधीर-जायसवाल: अवदत् यत् सम्बद्धविभागा: अभिकरणानि च अस्मिन् प्रकरणे विचारं कुर्वन्त: सन्तीति।
- भारतीया जीवविज्ञानकोविदा वन्यजीवसंरक्षिका च पूर्णिमादेवी-बर्मन इत्येषा टाइमपत्रिकया **वुमनऑफ द ईयर** इति उपाधिम् अधिगतवती।
- वुमेन्स प्रीमियर-लीग-इत्येतस्यां क्रिकेट-प्रतिस्पर्धायां रॉयल-चैलेन्जर्सबेंगलुरु-दलस्य प्रतिस्पर्धा मुम्बई-इण्यिन्स-दलेन समम् अद्य सायंकाले बेङ्गलुरूनगरे एम्. चिन्नास्वामि-क्रीडाङ्गणे सुनिश्चिता अस्ति।

**प्रधानमन्त्री सोलइति सम्मलेनम्**

भारतं वैश्विकशक्तिकेन्द्रत्वेन उद्भूतम् अस्ति इत्यस्मात् कारणात् देशस्य प्रत्येकस्मिन् क्षेत्रे ऊर्जावतां नेतृणाम् आवश्यकता वर्तते इति प्रधानमन्त्रिणा नरेन्द्रमोदिना सबलतया प्रोदीरितं । अद्य नवदिल्ल्याः भारतमण्डपे स्कूल्-आफ्-अल्टिमेट्-लीडर्शिप् सोल इत्येतस्य सम्मेलनस्य प्रथमसंस्करणस्य उद्घाटनानन्तरं सम्बोधयन् श्रीमोदी अवदत् यत्, देशे एतादृशानां विश्वस्तरीयनेतृणाम् आवश्यकता वर्तते ये प्रवृत्तिं निर्धारयितुं कठिनतायाः समाधानानि च अन्वेष्टुं शक्नुवन्ति।

अत्रावधौ जनसमागमं सम्बोधयन् प्रधानमन्त्री विश्वस्तरीयस्य नेतृत्वस्य निर्माणे सोल् इत्यस्य महत्त्वम् उद्घाटितवान्। श्रीमोदी अवदत् यत् राष्ट्रस्य विकासे मानवसंसाधनं प्रमुखां भूमिकां निभालयति इति।

वैश्विक-उत्तम-अभ्यासैः सह सम्पर्कं स्थापयित्वा विश्व-स्तरीय-शासनस्य तथा च नीति-निर्माण-पर्यावरणव्यवस्थायाः निर्माणार्थम् आवश्यक-पदक्षेपा: उत्थापनीया: इति प्रधानमन्त्री कथितवान्। असौ इत्यपि अवदत् यत् स्कूल्-आफ़्-अल्टिमेट्-लीडर्शिप् इत्यस्य स्थापना विकसित-भारतस्य यात्रां प्रति महत्त्वपूर्णं सोपानमिति अस्ति इति। अस्मिन् अवसरे भूटान-देशस्य प्रधानमन्त्री दाशो शेरिङ्ग् तोब्गे इत्यसौ अवदत् यत् सोल इति प्रामाणिकनेतृणां पोषणार्थं प्रधानमन्त्रिणः नरेन्द्रमोदिनः अविचलप्रतिबद्धतायाः अन्यं प्रमाणमस्ति इति। सः अवदत् यत्, भारतं विकसितभारतं भवितुं सज्जम् अस्ति इति। द्विदिवसात्मकं सोल्-इति सम्मेलनम् एकं प्रमुखं मञ्चरूपेण कार्यं करिष्यति यत्र राजनीतिः, क्रीडाः, कलाः, प्रसारमाध्यमाः, आध्यात्मिकं जगतः, सार्वजनिकनीतिः, व्यवसायः, सामाजिकक्षेत्रम् इत्यादीनां विविधक्षेत्राणां नेतारः स्वस्य प्रेरकजीवनयात्रां विनिमयीकरिष्यन्ति। द-स्कूल्-आफ़्-अल्टिमेट्-लीडर्शिप् इतीदं गुजरातराज्ये आगामिनी नेतृत्व-संस्था अस्ति, या प्रामाणिकनेतृभ्यः सार्वजनिक-कल्याणं प्रवर्तयितुं समर्थं कर्तुं च परिकल्पिता अस्ति।

**प्रधानमन्त्री मराठी सम्मलेनम्**

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्या: विज्ञानभवने अष्टनवतितम् अखिलभारतीयमराठीसाहित्यसम्मेलनं समुद्घाटितवान्। त्रिदिवसात्मके एतस्मिन् सम्मेलने सांस्कृतिक प्रदर्शनेन सह प्रख्यातसाहित्य कारै: सह संवाद सत्रम् आयोजयिष्यते।

**नड्डा – स्वास्थ्य-व्ययम्**

केन्द्रीयस्वास्थ्यमन्त्री जे. पी. नड्डा: अभिव्यक्तवान् यत् विगतेषु दशसु वर्षेषु स्वास्थ्ये सम्भूयमाने व्यये चतु:षष्टिप्रतिशतात् अल्पतागता साम्प्रतं नवत्रिशत्प्रतिशतं यावदेव जातम्। अद्य नवदिल्ल्याम् पञ्चविंशत्यधिक-द्विसहस्र-तमवर्षस्य अन्ताराष्ट्रिय-स्वास्थ्य-सम्वादस्य द्वादशसंस्करणम् सम्बोधयन् श्रीनड्डा: प्रावोचत् यत् प्रधानमन्त्री-जनारोग्ययोजनाया: राष्ट्रिय-स्वास्थ्याभियानस्य अन्यासां च योजनानाम् अन्तर्गतं प्रदीयमानाभि: सेवाभिस्सह स्वास्थ्ये गम्यमाने व्यये अल्पता समङ्किता।

**दिल्ली-विधानसभा-सत्रम्**

त्रिदिवसात्मकं दिल्ली-विधानसभासत्रम् सोमवासरात् समारप्स्यते। वार्ताहरान् सूचयन् भाजपेतिदलीय: नेतार: विजेन्द्रगुप्ता: कथितवान् यत् दिल्ली-मन्त्रिमण्डलेन फरवरीमासे चतुर्विंशति-पञ्चविंशति-सप्तविंशतिदिनाङ्केषु त्रिदिवसात्मकस्यास्य विधानसभासत्रस्य आयोजनाय निर्णय: निर्णीत:। असौ अवदत् यत् अध्यक्ष-उपाध्यक्षयो: निर्वाचनान्तरं सत्रस्य प्रथमा कार्यसूची सी.ए.जी. इति प्रतिवेदनस्य प्रस्तुतिकरणमिति विद्यते।

**टाइम्स-वुमनऑफदईयर पुरस्कार:**

भारतीया जीवविज्ञानकोविदा वन्यजीवसंरक्षिका च पूर्णिमादेवी-बर्मन इत्येषा टाइमपत्रिकया **वुमनऑफ द ईयर** इति उपाधिम् अधिगतवती। अयं पुरस्कार: विविधेषु क्षेत्रेषु अद्वितीय-कार्येभ्य: प्रदीयते। पञ्चचत्वारिंशत्-वर्षीया पूर्णिमादेवी अस्यां सूच्याम् एकमात्रमेव भारतीया महिलास्ति। असम-प्रदेशवास्तव्या पूर्णिमा-देवी लुप्तप्राय-स्थानीयस्य हरगिला-पक्षिण: रक्षायां स्वोत्कृष्टप्रयासेभ्य: ज्ञायते।

**महाकुम्भ**

***प्रयागराजे महाकुम्भे, भक्ति-आस्था-आध्यात्मिकताभि: साकं शिक्षायाम् अपि सविशेषं बलं प्रदीयते । उत्तर-प्रदेश-सर्वकारस्य उपक्रमस्य अन्तर्गतं, मेला-क्षेत्रस्य प्रत्येकमपि सेक्टर इति क्षेत्रेषु विद्याकुम्भ-नाम-का: विद्यालया: स्थापिता: सन्ति। अस्माकं स्रोतांसि सूचयन्ति यत् पञ्चमी-कक्षा पर्यन्तं छात्रेभ्य: नि: शुल्कं शिक्षया सममेव अन्या: सुविधा: अपि प्रदीयमाना: सन्ति। देशस्य विभिन्न-भागेभ्य: महाकुम्भे कार्यं कर्तुम् आगता: श्रमिक-बालका: अत्र विद्याकुम्भ-विद्यालयेषु पठन्ति। एतेषां सचल-विद्यालयानां माध्यमेन महाकुम्भस्य अवसरेऽपि बालकानां शैक्षिकी प्रगति:विनैव व्यवधानं यस्थावस्थमेव प्रचलति। स्यूतं, गणपरिधानं, पादत्राणं च अतिरिच्य, सर्वाणि आवश्यकानि अध्ययन-वस्तूनि छात्रेभ्य: नि:शुल्कं वितीर्यन्ते। एतेषां विद्यालयानां छात्राणां कृते "स्मार्ट क्लास" इति कुशलकक्षा: अपि सन्ति, यद्धि भूरि जनानां कृते एक: नूतन: अनुभव: वर्तते। आकाशवाण्या साकं सम्भाषमाण: , महाकुम्भ-मेला-क्षेत्रस्य द्वितीयस्य सेक्टर-क्षेत्रस्य विद्याकुम्भस्य प्रधानाध्यापक: दिलीप-कुमारमिश्र: प्रावोचत् यत् विद्या-कुम्भे अधीयानेभ्य: बालकेभ्य: नि: शुल्कं शिक्षया सह अन्यानि सौविध्यानि अपि सन्ति दीयमानानि। विद्याकुम्भस्य एका शिक्षिका, डॉ. संगीता आकाशवाणीम् असूचयत् यद् विद्यालयस्य बालिकानां सशक्तीकरणेऽपि ध्यानं केन्द्रीकृतम् अस्ति। कुम्भ-विद्यायां अधीयाना: छात्रा: अपि आकाशवाण्या साकं निजानुभवान् विनिमयीकृतवन्त:। दूरदर्शनस्य महानिदेशक:, कञ्चन-प्रसाद: अद्य प्रत्यपादयत् यत् प्रयागराजे समनुष्ठीयमान: महाकुम्भ: आस्थाया:, संस्कृते: आध्यात्मिकतायाश्च संगमो वर्तते। महाकुम्भ मेला-क्षेत्रस्य चतुर्थे सेक्टर-स्थले कुंभवाणी स्थासने जनान् संबोधयन्ती, श्रीमती प्रसाद: प्रोक्तवती कुम्भवाणी अस्य दिव्य-आयोजनस्य सन्देशं समेषां हृदयेषु प्रापयितुम् एक: अविश्वसनीय: माध्यम: सिद्ध: अस्ति। संस्कृतवार्त्ताकक्षत: युवराजभट्टराई।***

**जम्मू और कश्मीर राष्ट्रीय राजमार्ग:**

जम्मू-कश्मीरे द्विपक्षीयं यातायातं प्रतिबंधितम् अस्ति। बनिहालस्य रामसू इत्यस्य च मध्ये निरन्तरं जायमानस्य हिमपातस्य कारणेन अस्थायी रूपेण अवरुद्धः एनएच चतुश्चत्वारिंशत् इत्याख्यः जम्मू-श्रीनगर-राष्ट्रीय-राजमार्गः पुनः प्रवर्तितः। आकाशवाण्याः जम्मू-वार्त्ताहरेण सूचितम् यत् यात्रि-वाहनानि सम्प्रति उभयपक्षतः चलन्ति सन्ति। यातायातारक्षिबलेन प्रतिपादितं यत् भारवाहि-वाहनानाम् अपि गमनागमनं शीघ्रमेव अनुमंस्यते। यात्रिणां सुरक्षित-यात्रायै मार्गपङ्क्तेरनुशासनस्य पालनार्थम् परामर्शः प्रदत्तः अस्ति। इतः पूर्वं, राष्ट्रिय-राजमार्गः ह्यः चिरसायं वाहनानां यातायातार्थं पिहितः आसीत्।

**दूबखनिजोपलब्धता**

कृष्णाङ्गारखनि-राज्यमन्त्री सतीशचन्द्रदूबे इत्यसौ देशे महत्वपूर्ण-खनिजानां निर्बाधम् आपूर्तिं सुनिश्चेतुम् आह्वानं कृतवान्। अद्य नवदिल्ल्यां फिक्की-समवाय-द्वारा आयोजितं महत्वपूर्ण-खनिज-मैट्रिक्स-सम्मेलनं सम्बोधयन्, श्रीदूबे प्रोक्तवान् यत् सर्वकारेण राष्ट्रिय-महत्वपूर्ण-खनिजाभियानं प्रारब्धम् अस्ति यस्योद्देश्यः दैशिक-वैदेशिक-स्रोतोभ्यः खनिजानम् उपलब्धता-सुनिश्चयन-पूर्वकम् भारतस्य महत्वपूर्ण-खनिजापूर्ति-श्रृंखलायाः सुरक्षा वर्तते।

**विदेशमन्त्रालयः नेपालीछात्राप्रकरणम्**

विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवालः प्रत्यपादयत् यत् ‘‘मया नेपाली-छात्राः प्रोक्ताः सन्ति यत्ते मां सूचयन्तु यत्ते किं सूचयितुमीहन्ते। अनेन प्रोक्तं यत् भारतदेशे समेषाम् अन्ताराष्ट्रीय-छात्राणां सुरक्षा-संरक्षा-कल्याणानि च उच्चप्राथमिकतायां स्थाप्यन्ते। नवदिल्ल्यां पत्रकारान् संबोधयन् श्री-जायसवालः प्रावोचत् यत् नेपाली-छात्रायाः मृत्योः प्रकरणस्य आगमनानन्तरं मन्त्रालयः ओडिशासर्वकारेण, के.आई.आई.टी. विश्वविद्यालयस्य अधिकारिभिश्च साकं निरन्तरं संपर्के वर्तते। अनेन प्रोक्तं यत् मन्त्रालयः नेपाली-अधिकारिणामपि निकट-सम्पर्के वर्तते। श्रीजायसवालः प्रोक्तवान् यत् ओडिशारक्षिबलेन आरोपिभिः सहितानाम् अनेकेषां निगडनं कृतम् अस्ति।

**क्रिकेट**

वुमेन्स प्रीमियर-लीग-इत्येतस्यां क्रिकेट-प्रतिस्पर्धायां रॉयल- चैलेन्जर्सबेंगलुरु-दलस्य प्रतिस्पर्धा मुम्बई-इण्यिन्स-दलेन समम् अद्य सायंकाले बेङ्गलुरूनगरे एम्. चिन्नास्वामि-क्रीडाङ्गणे सुनिश्चिता अस्ति।

**।। इति वार्ता:।।**